Anusandhanvallari
Vol 2024, No.1
September 2024
ISSN 2229-3388

# सनातनपरम्परायां नारीशक्तिः दार्शनिकं सामाजिकं च स्वरूपम्

**डॉ. अमिता सिंहः**
सह-आचार्या (संस्कृत-विभागः),
सावित्रीबाई-फुले-राजकीय-स्नातकोत्तर-महाविद्यालयः,
चकिया, चन्दौली (उत्तरप्रदेशः)

**शोध–सारांशः–**

अयं शोधलेखः भारतीय-सनातनपरम्परायां नार्याः गरिमामय-दार्शनिक-बहुआयामि-स्वरूपस्य एकं विस्तृतम् अनुशीलनं वर्तते। साङ्ख्यदर्शनस्य 'प्रकृति-पुरुष' सिद्धान्तात् आरभ्य तन्त्रशास्त्रस्य 'कुण्डलिनी' ऊर्जायवत्, नारी न केवलं काचित् सामाजिका ईकाई, अपितु सृष्टेः सञ्चालनस्य अनिवार्या 'चित्-शक्तिः' (चेतना-ऊर्जा) इति रूपेण प्रतिष्ठिता अस्ति। वैदिकयुगे नार्याः 'अदिति' (स्वतन्त्रा) सत्ता, ऋषिकाणां (घोषा-अपाला-लोपामुद्रादीनां) ज्ञानसाक्षात्कारः, उपनिषत्काले च गार्गी-मैत्रेयीभ्यां प्रदर्शितं बौद्धिक-वर्चस्वं तस्याः प्रामाण्यं प्रददाति। रामायण-महाभारतकालयोः नारी सामाजिकन्यायस्य, धर्मरक्षायाः, नीतिनिर्माणस्य च धुरीरूपेण चित्रिता अस्ति। मध्यकालीन-सामाजिक-आह्वानैः सह मीराबाई-राज्ञी लक्ष्मीबाई-सावित्रीबाई फुले सदृशीभिः विभूतिभिः नार्याः सङ्घर्षशीलता अक्षुण्णा रक्षिता। वर्तमान-परिप्रेक्ष्ये, आधुनिकी नारी स्वपरम्पराभिः सह संलग्ना भूत्वा विज्ञान-कूटनीति-नेतृत्व-क्षेत्रेषु 'ब्रह्मवादिनी' तथा 'सद्योवधू' इत्यनयोः समन्वितरूपेण प्रतिष्ठिता अस्ति। निष्कर्षतः, नारी सृष्टेः शाश्वती आधारशिला वर्तते, यस्याः सम्मानं कस्यचित् समाजस्य विकासस्य 'स्वर्णसूत्रम्' अस्ति। नर-नार्योः पूरक-मिलनमेव सभ्यतायाः पूर्णतायाः राष्ट्रस्य पुनर्जागरणस्य च एकमात्रः मार्गः अस्ति, यत्र नारी स्वकीयया आत्मशक्त्या चेतनया च सञ्चालिता एका आत्मनिर्भरा ईकाई वर्तते।

**मुख्य–शब्दाः–** सनातनपरम्परा, नारीशक्तिः, चित्–शक्तिः, ब्रह्मवादिनी, सद्योवधूः, पूरकता–सिद्धान्तः, वैदिक–ऋषिकाः, अर्धनारीश्वरः, सामाजिक–पुनर्जागरणम्, आत्म–चेतना।

नारी सृष्टेः आधारशिला विधातुः सर्वश्रेष्ठा रचना च अस्ति। नार्याः अभावे सृष्टेः कल्पना अपि असम्भवा वर्तते। सम्पूर्ण चराचरजगतस्य निर्माणाय तस्य कुशलसञ्चालनाय च नार्याः उपस्थितिः अनिवार्या अपरिहार्या च अस्ति। साङ्ख्यदर्शनस्य अनुसारं, प्रकृतिपुरुषयोः संयोगात् एव महत् (बुद्धिः), अहङ्कारः, पञ्चतन्मात्राणि तथा पञ्चमहाभूतानाम् उत्पत्तिः भवति। इयं जडचेतनयोः तादृशं संयोगमस्ति यत् सम्पूर्णसृष्टेः विकासमार्गं प्रशस्तं करोति–

**प्रकृतेर्महाँस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।**

**तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि।।**[1]

साङ्ख्यदर्शनस्य प्रतीकात्मकस्वरूपे प्रकृतिः नारीं प्रतिनिधत्ते, पुरुषश्च नरम्। यद्यपि सिद्धान्ततः पुरुषः गतिशीलः मन्यते प्रकृतिः (नारी) च स्थिरा, तथापि प्रकृतेः अभावे पुरुषस्य गतिशीलता नैव सम्भवति। अस्य

दर्शनस्य अनुसारमपि पुरुषस्य अस्तित्वस्य आधारः प्रकृतिरेव अस्ति। पुरुषस्य अभिव्यक्तये प्रकृतिः माध्यमं भवति। प्रकृतिं विना पुरुषः 'कैवल्यं' (मोक्षं) तु प्राप्तुं शक्नोति, परन्तु सृष्टेः अनुभवं कर्तुं न शक्नोति। यदि पुरुषः सङ्कल्पस्य विचारस्य वा प्रतीकः अस्ति, तर्हि स्त्री तस्य विचारस्य साकाररूपा शक्तिः सृजनशीलता च अस्ति।

भारतीयधर्मग्रन्थानां दृष्ट्या अपि वयं पश्यामः यत् नरनार्योः पारस्परिकसहयोगेनैव सृष्टेः प्रादुर्भावः सम्भवति। सनातनदर्शने शक्तिः ब्रह्मणः सा सामर्थ्यभूता मन्यते, यया विना ब्रह्म 'असत' (निष्क्रियः) इव अस्ति। वेदान्त-तन्त्रशास्त्रानुसारं, यथा अग्नेः उष्णता सूर्यस्य च प्रकाशः पृथक् कर्तुं न शक्यते, तथैव परमात्मनः तस्य 'शक्तिः' विलग न भवति। श्रीमदादिशङ्कराचार्याः यद्यपि सन्न्यासमार्गे नारीं 'माया' इति उक्तवन्तः, किन्तु 'सौन्दर्यलहर्याः' प्रथमश्लोके एव तैः स्वीकृतं यत् शक्तिं विना शिवः सृजनं कर्तुं न शक्नोति–

**न शिवेन विना शक्तिर्न शक्त्या च विना शिवः।**

**न चान्यन्मध्ययोर्भेदश्चन्द्रचन्द्रिकयोरिव॥**[2]

तन्त्रशास्त्रे शक्तिः (नारीतत्त्वं) गतेः, सृजनस्य, अभिव्यक्तेश्च आधारः अस्ति। योग-तन्त्रानुसारं प्रत्येकस्मिन् मनुष्ये या सर्वोच्चा आध्यात्मिकी ऊर्जा विद्यते, सा 'कुण्डलिनी' इति कथ्यते, या सर्पिणीरूपे (स्त्रीरूपे) चित्रिता अस्ति। एतद् सूचयति यत् मोक्षस्य परमचेतनायाः वा प्राप्तिः स्त्रीतत्त्वस्य जागरण विना असम्भवा अस्ति। तन्त्रे नार्याः दशरूपाणां (यथा काली, तारा, त्रिपुरसुन्दरी) पूजा भवति-

**काली तारा महाविद्या षोडशी भुवनेश्वरी।**

**भैरवी छिन्नमस्ता च विद्या धूमावती तथा॥**

**बगला सिद्धविद्या च मातंगी कमलात्मिका।**

**एता दश महाविद्याः सिद्धविद्याः प्रकीर्तिताः॥**[3]

एतानि दशरूपाणि मनोविज्ञानस्य विभिन्नस्तराणां–भय-सौन्दर्य-ज्ञान-संहाराणाम्–प्रतिनिधित्वं कुर्वन्ति। एतेन सिद्धं भवति यत् नार्याः व्यक्तित्वं बहुआयामि अस्ति। अर्धनारीश्वरसिद्धान्तः न केवलं काचित् मूर्तिः, अपितु एकं महान् तान्त्रिकं मनोवैज्ञानिकं च सत्यमस्ति। एतद् दर्शयति यत् पूर्णता तदा आगच्छति यदा मनुष्यस्य अन्तः स्थितः 'पुरुषः' (चेतना) 'स्त्री' (शक्तिः/माया) च सन्तुलितौ भवतः-

**"अर्धनारीश्वरो भूत्वा प्रपञ्चं सृजते हरः।**

**शिवशक्तिसमायोगात् सृष्टिः संजायते ध्रुवम्॥"**[4]

**"रुद्रश्चोमा च देवोऽसौ उमा रुद्रस्तथैव च।**

**नियोगस्तत्र मन्तव्यः प्रकृतिः पुरुषः प्रभुः॥"**[5]

तान्त्रिकदृष्ट्या नारी 'आद्या' (प्रारम्भिकी ऊर्जा) अस्ति, मनोवैज्ञानिकदृष्ट्या च सा धैर्यस्य पराकाष्ठा अस्ति। अनयोः उभयोः आयामयोः मेलनम् एतत् सिद्धं करोति यत् नार्याः अस्मिता कस्यचित् पुरुषस्य दयायां न आश्रिता, अपितु तस्याः अन्तः स्थितायां 'चित्-शक्तौ' आधारिता अस्ति-

Anusandhanvallari
Vol 2024, No.1
September 2024
ISSN 2229-3388

**"चितिः स्वतन्त्रा विश्वसिद्धिहेतुः।**

**स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति।।"[6]**

सृष्टेः इतिहासः अस्य तथ्यस्य जीवन्तः साक्ष्यः अस्ति यत् नरः नारी च परस्परं पूरकौ स्तः। भारतीयपुराणानुसारं मनु-शतरूपयोः (श्रद्धायाः), कुरान-ग्रन्थानुसारं आदम-हव्वयोः, बाइबिल-ग्रन्थानुसारं च एडम-ईव इत्यनयोः वृत्तान्तः अस्यैव शाश्वतसत्यस्य प्रमाणं वर्तते। तत्वतः, वयं केवलं 'नरः' अथवा 'नारी' भवितुं शक्नुमः, किन्तु परस्परं मिलित्वा एव वयं 'संसारी' भवामः। यदि नरः अनन्तः आकाशः अस्ति, तर्हि नारी विस्तृता पृथ्वी अस्ति; अनयोः द्वयोः पावनसंयोगेनैव तस्य 'क्षितिजस्य' सृजनं भवति, यत्र जीवनं स्वकीयां पूर्णतां प्राप्नोति।

भारतीयसंस्कृतौ ज्ञानस्य महत्त्वं तु अस्ति, किन्तु सृजनस्य, सहनशीलतायाः, स्नेहस्य च या शक्तिः मातुः पार्श्वे अस्ति, सा अतुलनीया अस्ति। माता गर्भधारणं करोति, स्वपुत्रस्य पालनं पोषणं च करोति, तस्मै संस्कारान् ददाति। अतः सा संसारे सर्वेभ्यः गुरुभ्यः पितृभ्यः च महत्तरं स्थानं प्राप्नोति-

**"उपाध्यायान्दशाचार्य आचार्याणां शतं पिता।**

**सहस्रं तु पितृन्माता गौरवेणातिरिच्यते॥"[7]**

मानवजातेः जन्मनः, अभ्युत्थानस्य, प्रेरणायाश्च प्रदात्रीरूपेण नार्याः महत्ता सर्वोपरि वर्तते। सहचरी सहधर्मिणी च भूत्वा जीवनयात्रां सफलां, सुगमां, समृद्धिमयीं च कुर्वती नारी–माता, कन्या, भगिनी, पत्नी च इति रूपेषु समाजे पूर्णतः प्रतिष्ठिता मान्या च अस्ति। विशेषतः **'माता'** इति रूपेण नारी स्वशिशोः व्यक्तित्वनिर्माणे चारित्रिकविकासे च सर्वाधिकमहत्वपूर्णां भूमिकां निर्वहति। नार्याः एतत् महत्तरं कार्यं (संस्कार-सिञ्चनम्) तस्मिन्नेव क्षणे आरभते, यदा सा गर्भाधानं करोति। गर्भावस्थायां तस्याः अन्तर्निहिताः भावनाः जीवनशैली च गर्भस्थशिशोः शारीरिक-मानसिकविकासे गम्भीरं प्रभावं जनयन्ति। अस्माकं परिवाराणां वयोवृद्धाः अनुभवीसदस्याः च प्रायः परामर्शं यच्छन्ति यत्– गर्भकाले धार्मिक-प्रेरणाप्रदग्रन्थानां पठनं करणीयम्। हिंसकदृश्यानां चलच्चित्राणां च दर्शनं न करणीयम्, कटुवचनानां श्रवणं च वर्जनीयम्। 'सदैव प्रसन्नचित्ता भव' इति सावधानता भाविजनन्यै दीयते, येन एकस्य स्वस्थस्य, संस्कारवतः, ओजस्विनः च शिशोः प्रादुर्भावः भवेत्। ऐतिहासिकं वैज्ञानिकं च साक्ष्यम मातुः अन्तरात्मना सह सम्बद्धः गर्भस्थशिशुः स्वशिक्षायाः श्रीगणेशम् गर्भस्य अन्धकारे एव करोति। भारतीय-इतिहास-पुराणेषु अस्य साक्ष्याणि प्रत्यक्षं विद्यन्ते। यथा महाभारते वर्णितमस्ति– वीरः अभिमन्युः स्वमातुः सुभद्रायाः गर्भे स्थित्वैव चक्रव्यूहस्य भेदनविद्यां ज्ञातवान्-

**"यः स चक्रधरो जज्ञे सोमपुत्रः प्रतापवान्।**

**स सुभद्रायामभिमन्युर्जज्ञे अर्जुनसुतः प्रभुः॥**

**बाल एव हि तं तातः सर्वशस्त्रभृतां वरः।**

**चक्रव्यूहविनाशार्थं शिक्षयामास पाण्डवः॥"[8]**

अतः नारी केवलं प्रसवकर्त्री नास्ति, अपितु सा सा शिल्पिणी अस्ति या गर्भकालादेव आगामिपीढ्याः चरित्रस्य आधारशिलां स्थापयति। आधुनिकं विज्ञानम् (Epigenetics) अपि इदानीं स्वीकरोति यत् मातुः मानसिकस्वास्थ्यं वातावरणं च शिशोः DNA तथा मस्तिष्कस्य संरचनां प्रभावितं करोति। शिशोः जन्मोपरान्तं माता एव बालकस्य

Anusandhanvallari
Vol 2024, No.1
September 2024
ISSN 2229-3388

**प्रथमा शिक्षिका** भवति। मानवीयजीवने मूल्यानां संस्काराणां च बीजारोपणं मात्रा एव क्रियते। मातुः व्यक्तित्वस्य कृतित्वस्य च बालकस्य कोमलमनसि गम्भीरः प्रभावः पतति। महर्षिमनुः अपि कथयति यत् सन्तानस्य उत्पत्तिः, तस्य पालनपोषणं, दैनन्दिनव्यवहारस्य (भोजन-गृहसञ्चालनादीनां) सुचारुप्रबन्धनं च–एते सर्वे अंशाः नारीम् एव आश्रिताः सन्ति।

**"उत्पादनमपत्यस्य जातस्य परिपालनम्।**

**प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम्॥"**[9]

इतिहासः अस्य तथ्यस्य जीवन्तः साक्ष्यः अस्ति यत् यथा एकः कुशलः मालाकारः लघुपादपं सिञ्चति, तथैव माता पुतलीबाई महात्मागान्धिनः जीवने सत्य-अहिंसयोः बीजानि वप्तवती। अपरतः माता जीजाबाई छत्रपति-शिवाजी-महाराजस्य अन्तमने स्वाभिमानस्य वीरतायाश्च श्रेष्ठसंस्काराणां प्रत्यारोपणं कृतवती।

पत्नीरूपेण नारी परिवारस्य सा मौनशक्तिः अस्ति, या गृहव्यवस्थायाः धुरं धारयति। नारी पुरुषस्य गृहं स्वकीयं मत्वा जीवनपर्यन्तं स्वकीयानां उत्तरदायित्वनां कुशलतापूर्वकं निर्वहणं करोति। अनयैव निश्चिन्ततया पुरुषः बाह्यजगते स्वकर्तव्यानां समुचितं सम्पादनं कर्तुं समर्थः भवति, सफलतायाः शिखरं च प्राप्नोति। एतदेव कारणं यत् भारतीयसमाजे नारी दुर्गा (शक्तिः), लक्ष्मी (सम्पन्नता), सरस्वती (ज्ञानम्) इति साक्षात् स्वरूपेषु पूज्यते।

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥"**[10]

सनातनपरम्परायां नार्याः भूमिका केवलं सामाजिका नास्ति, अपितु एका गरिमामयी, बहुआयामिनी, आध्यात्मिकी च आधारशिला अस्ति। वैदिकयुगे नार्याः स्थितिः 'अदितिः' (अखण्डनीया स्वतन्त्रा च) इति रूपेण प्रतिष्ठिता आसीत्। तस्मिन् काले शिक्षायां नार्याः एकाधिकारः आसीत्, ताः पुरुषवत् उपनयनसंस्कारस्य पूर्णमधिकारं प्राप्तवत्यः आसन्। वैदिकसमाजे स्त्रियः मुख्यतया द्वयोः श्रेण्योः विभक्ताः आसन्:-

1) **ब्रह्मवादिनी-** या आजीवनं ब्रह्मचर्यं पालयित्वा वेद-वेदाङ्गानां चिन्तने लीनाः भवन्ति स्म।

2) **सद्योवधूः-** या विवाहपर्यन्तं उच्चशिक्षां प्राप्नुवन्ति स्म।

ऋग्वेदस्य इतिहासः अस्य प्रमाणम् अस्ति यत् नारी केवलं मन्त्राणां श्रोत्री नासीत्, अपितु सा मन्त्राणां 'द्रष्ट्री' (ऋषिका) अपि आसीत्। ऋग्वेदे प्रायः सप्तविंशतिः (२७) तादृशीनां विदुषीनां उल्लेखः प्राप्यते, याभिः अलौकिकसूक्तानां साक्षात्कारः कृतः। घोषा: अस्याः नाम अग्रणी अस्ति, यया स्वकीयया तपस्यया स्वास्थ्यलाभः प्राप्तः, ऋग्वेदस्य दशममण्डलस्य सूक्तयोः (३९-४०) रचना च कृता। अपाला अनया इन्द्रस्य स्तुतौ मन्त्राः रचिताः, कृषि-सोमानुष्ठानेषु च स्वदक्षता सिद्धा कृता। लोपामुद्रायाः योगदानम् अद्वितीयं वर्तते। अनया ऋग्वेदस्य प्रथममण्डले (सूक्तम् १७९) रतिः (सांसारिकसुखम्) तथा तपः (आध्यात्मिकसाधना) इत्यनयोः मध्ये सन्तुलनविषये महान् दार्शनिकसंवादः स्थापितः। उपनिषद्कालं यावत् अयं बौद्धिकविमर्शः अधिकः प्रखरः जातः। राज्ञः जनकस्य सभायां महर्षि-याज्ञवल्क्यं प्रति शास्त्रार्थाय आह्वयन्त्याः गार्ग्याः उदाहरणं भारतीय-इतिहासे अद्वितीयं वर्तते। गार्ग्या ब्रह्माण्डस्य उत्पत्तौ 'अक्षयतत्त्वे' च तादृशाः कठिनाः प्रश्नाः पृष्टाः येन ऋषिः याज्ञवल्क्यः अपि स्तब्धः जातः- **"स होवाच गार्गि मातिप्राक्षीर्मा ते मूर्धा व्यपप्तत्। अनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि मातिप्राक्षीरिति॥"**[11] इयं घटना सिद्धं करोति यत् तस्मिन् काले स्त्रियः सार्वजनिकसभासु

शीर्षस्थविद्वद्भिः सह तर्कं कर्तुं पूर्णतः स्वतन्त्राः आसन्। तथैव, मैत्रेयीप्रसङ्गः दर्शनस्य पराकाष्ठा अस्ति। यदा याज्ञवल्क्यः तस्यै भौतिकसम्पत्तिं दातुं प्रस्तावं कृतवान्, तदा मैत्रेयी कालजयिनं प्रश्नं पृष्टवती–

**"येनाहं नामृता स्यां किमहं तेन कुर्याम्?**

**यदेव भगवान्वेत तदेव मे ब्रूहीति ॥"**[12]

(अर्थात्–येन धनेन अहं मोक्षं वा अमरतां न प्राप्नुयाम्, तेन धनेन अहं किं करिष्यामि?) अयं प्रश्नः स्पष्टं करोति यत् वैदिकनार्याः उद्देश्यं केवलं भौतिकसुखं नासीत्, अपितु आत्मज्ञानं मोक्षश्च आसीत्।

हारीत-धर्मसूत्रे स्पष्टः उल्लेखः अस्ति यत् ब्रह्मवादिनीनां स्त्रीणाम् उपनयनं, वेदाध्ययनं, अग्निहोत्रं (हवनं) च अनिवार्यम् आसीत्। अतः सनातनपरम्परायां नार्याः स्थानं केवलं सेवापर्यन्तं सीमितं नासीत्, अपितु सा ज्ञानस्य दीपशिखा इव समाजाय दिशानिर्देशिका ऋषिका आसीत्, यया वेदानां माध्यमेन सनातनसंस्कृतेः आधारशिला सुदृढा कृता। उपनिषद्काले नारी न केवलं पुरुषस्य सहचरी आसीत्, अपितु सा ज्ञानस्य, तर्कस्य, आत्मसाक्षात्कारस्य च मार्गे पुरुषस्य समकक्षम्, कुत्रचित् च तस्मात् अपि अग्रेसरी आसीत्। ताभिः विदुषीभिः एतत् सुनिश्चितं कृतं यत् सनातनपरम्परायां नार्याः स्थानं सदैव ज्ञानस्य अधिष्ठात्री इति रूपेण अक्षुण्णं तिष्ठेत्।

महाकाव्यकालः (रामायणं महाभारतं च) सनातनपरम्परायाः सः स्वर्णयुगः अस्ति, यत्र नार्याः व्यक्तित्वं केवलं कौटुम्बिकपरिधौ सीमितं न भूत्वा सामाजिकन्यायस्य, राजनीतेः, धर्मरक्षायाः च धुरी सञ्जाता। रामायणे माता सीतायाः चरित्रं पतिव्रतायाः सहैव एकायाः स्वतन्त्रनिर्णयकर्त्र्याः सशक्तनार्याः अस्ति। यदा श्रीरामः वनवासाय आदिष्टः, तदा सः सीतां राजप्रासादस्य सुखेषु स्थातुं परामर्शं दत्तवान्। किन्तु सीतायाः तर्कः अतीव मार्मिकः दृढश्च आसीत्; सा अर्धाङ्गिन्याः कर्तव्यं सर्वोपरि मत्वा वनस्य कष्टानि सहर्षं स्वीकृतवती। रावणस्य अशोकवाटिकायां बन्दिनी भूत्वा अपि सा स्वमनोबलं न त्रुटितवती। एकस्य तृणस्य अन्तरालं कृत्वा रावणसदृशं बलशालिनं अहङ्कारिणं च तिरस्कृतवती, एतत् तस्याः मानसिकशक्तेःस्वाभिमानस्य च प्रमाणम्-

**"तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता।**

**निवर्तय मनो मत्तः स्वजने क्रियतां मनः॥"**[13]

सीतायाः व्यक्तित्वं पृथिव्याः इव धैर्ययुक्तं वर्तते। वाल्मीकि-आश्रमे एकाकिनी स्थित्वा लव-कुशसदृशानां तेजस्वीनां वीराणां च पुत्राणां पालनपोषणं कृत्वा सा एकायाः एकलमातुः रूपेण सामर्थ्यस्य आत्मनिर्भरतायाः च जीवन्तं साक्ष्यं दत्तवती।

महाभारतस्य द्रौपदी (कृष्णा) सनातनसाहित्यस्य सर्वाधिक तार्किकी सशक्ता च नारीपात्रमस्ति। तस्याः चरित्रं अन्यायस्य विरुद्धं प्रज्वलिता दीपशिखा इव अस्ति। राजसभायां यदा तस्याः अपमानप्रयत्नः जातः, तदा सा विलापं विहाय भीष्म-धृतराष्ट्रसदृशान् दिग्गजपुरुषान् प्रश्नानां न्यायालयस्थले स्थापितवती। तस्याः प्रश्नः– किं युधिष्ठिरः आत्मानं पराजित्य मां पणप्रयुक्तवान् (द्यूते स्थापितवान्)?

**"किं नु पूर्वं पराजैषीदात्मानं मां नु भारत।**

**एतन्मे ब्रूहि पृच्छन्त्या यथावत् कुरुनन्दन ॥"**[14]

Anusandhanvallari
Vol 2024, No.1
September 2024
ISSN 2229-3388

–तस्याः तीक्ष्णतर्कशक्तेः विधिकौशलस्य च प्रमाणमस्ति। द्रौपद्याः मुक्ताः केशाः अस्य सङ्केताः आसन् यत् यावत् धर्म-अधर्मयोः निर्णयः न भवेत् नारी-अपमानस्य च प्रतिशोधः न स्वीक्रियेत, तावत् शान्तिः असम्भवा। श्रीकृष्णेन सह तस्याः 'सख्यभावः' दर्शयति यत् तस्मिन् युगे स्त्रीपुरुषयोः मध्ये बौद्धिक-आध्यात्मिकमैत्र्याः उच्चस्थानम् आसीत्। महाभारतस्य शान्तिपर्वे एकं कालजयि सूत्रम् उक्तम्–

**"न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते।**

**गृहं तु गृहिणीहीनं कान्तारसदृशं मतम्॥"**[15]

अस्य अर्थः अस्ति यत् केवलं इष्टिकाभिः, प्रस्तरैः, छदैः भित्तिभिः वा 'गृहं' न भवति, अपितु 'गृहिणी' एव वस्तुतः गृहस्य आत्मा अस्ति। अस्य सूत्रस्य त्रयः आयामाः सन्तिः-

1) **संस्कारकेन्द्रम्:** गृहस्य वातावरणं संस्काराश्च स्त्रियाः विवेके आश्रिताः सन्ति।

2) **प्रबन्धनम्:** गृहिणी अन्नपूर्णा अस्ति, सा परिवारस्य सामञ्जस्यस्य सेतुः भवति।

3) **सम्मानस्य प्रतीकम्:** यस्मिन् गृहे नारी सुखी पूजिता च नास्ति, तत् भवनं केवलं निर्जीवं पञ्जरः अस्ति।

अस्मिन् कालखण्डे नार्याः भूमिका केवलम् एतावत्पर्यन्तं सीमिता नासीत्। माता कौशल्या कुन्ती च विषमपरिस्थितिषु स्वपुत्रान् धर्मस्य मार्गे चलितुं प्रेरितवत्यौ। कुन्ती अत्यन्तं कष्टं सोढ्वा अपि स्वकीयान् पञ्चपुत्रान् संघटितान् रक्षितवती–

**"यं पालयसि धर्मं त्वं धृत्या च नियमेन च।**

**स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु॥"**[16]

अपरपक्षे, मन्दोदरी–गान्धारीसदृश्यः नार्यः स्वकीयान् शक्तिशालिनः पतीन् (रावणं धृतराष्ट्रं च) अधर्मस्य मार्गात् निरोद्धुं साहसं प्रदर्शितवत्यः। एतत् दर्शयति यत् सनातनपरम्परायां नारी नृपाणां पतीनां च कृते 'नैतिक–परामर्शदात्री' इति गौरवपूर्णं पदं प्राप्तवती आसीत्।

सनातनधर्मे नारी गृहस्वामिनी समस्त–माङ्गलिक–कार्याणां च पूर्णतायाः आधारभूता मन्यते। अश्वमेधयज्ञे श्रीरामेण सीतायाः स्वर्णप्रतिमायाः अनिवार्यता स्वीकृता, एतद् सिद्धयति यत् पुरुषस्य किमपि धार्मिकं कार्यं स्त्रियाः उपस्थित्या सम्मत्या वा विना अपूर्णमेव वर्तते–

**"कांचनीं मम पत्नीं च दीक्षाकाले यशस्विनीम्।**

**अग्रतो भरत कृत्वा गच्छ त्वं साग्रजो मम॥"**[17]

संक्षेपेण, महाकाव्यकालस्य नार्यः न केवलं परिवारस्य आधारशीलाः आसन्, अपितु ताः धर्म–नीति–समाज–पुनर्गठनस्य मुख्या शक्तिः अपि आसन्। ताभिः प्रमाणितं यत् नार्याः सम्मानमेव तत् स्वर्णसूत्रं वर्तते, यस्मिन् सम्पूर्णसभ्यतायाः गरिमा आश्रिता अस्ति।

मध्यकालः भारतीय-इतिहासस्य सः आव्हानात्मकः कालः आसीत्, यत्र वैदेशिक-आक्रमणैः रूढिवादी-मान्यताभिः च नार्याः स्थितौ ह्रासः जातः। सतीप्रथा, पर्दाप्रथा, शिक्षायाः अभावः च नार्याः 'अदिति' (स्वतन्त्रा) सत्तां दमितुं प्रयत्नाः कृताः। किन्तु मध्यकालस्य अन्धकारं छित्त्वा अनेकविभूतयः प्रादुर्भूता यथा– मीराबाई भक्तिमार्गेण सामाजिकबन्धनानि छित्त्वा ईश्वरं प्रति आत्मसमर्पणस्य पराकाष्ठां प्रदर्शितवती। तस्याः गीतेषु

नार्याः वैचारिकस्वातन्त्र्यस्य स्वरः मुखरः आसीत्। राज्ञी लक्ष्मीबाई खड्गमुत्थाप्य एतं सन्देशं दत्तवती यत् सङ्कटकाले नारी स्वयं स्वशक्त्याः राष्ट्रस्य च रक्षिका वर्तते। तस्याः बलिदानं भारतीय-स्वातन्त्र्य-सङ्ग्रामस्य सर्वाधिकं तेजस्वी अध्यायः अभवत्। प्रशासनिकदक्षतायाः विषये अहिल्याबाई होल्कर इत्यस्याः नाम स्वर्णाक्षरैः अङ्कितम् अस्ति। सा न केवलं स्वराज्यस्य सुचारुसञ्चालनं कृतवती, अपितु देशव्यापीनां मन्दिराणां, घट्टानां, धर्मशालानां च निर्माणं कारयित्वा लोककल्याणकारी-शासनस्य अनुपममुदाहरणं प्रस्तुतवती। नारीणां कृते शिक्षायाः द्वाराणि पुनः उद्घाटयितुं श्रेयः सावित्रीबाई फुले महोदयायै गच्छति, या घोर-सामाजिक-विरोधस्य अङ्गीकारेणापि बालिका-शिक्षायाः मार्गं प्रशस्तं कृतवती।

एताभिः नारीभिः प्रमाणितं यत् 'शक्तेः' अर्थः केवलं कोमलता नास्ति, अपितु कठोरासु परिस्थितिषु अपि अविचलत्वम् अस्ति। एताः मध्यकालीन-कुरीतिभ्यः आह्वानं दत्त्वा सनातनपरम्परायाः तस्य विलुप्तस्य गौरवस्य पुनः स्थापनां कृतवत्यः, यस्यां नारी ज्ञान-त्याग-वीरतानां साक्षात् प्रतीकमिति मन्यते स्म। एतासां जीवनसङ्घर्षः अस्मान् बोधयति यत् सनातनचेतनायाः मूलानि एतावन्ति गभीराणि सन्ति यत् बाह्याघाताः अपि तानि विनाशयितुं न शक्नुवन्ति; नारीशक्तिः सदैव स्वमार्गं निर्मातुं सफला अभवत्।

अद्यतनः युगः नार्याः कृते नूतनपुनर्जागरणस्य कालः अस्ति। अद्यतनी नारी न केवलं गृहस्वामिनी, अपितु विश्वचेतनायाः विस्तारशीलं रूपं अस्ति। आधुनिककाले सा विज्ञान-अन्तरिक्ष-कूटनीति-राजनीति-क्षेत्रेषु स्वकीयं विजयध्वजं उत्तोलितवती। एषा आधुनिकता न तु वैदेशिका, अपितु तस्याः वैदिकपरम्परायाः एव पुनरुत्थानं अस्ति, यत्र नारी 'ब्रह्मवादिनी' 'सद्योवधू' च आसीत्। संक्षेपेण, नारीशक्तिः सदैव स्वमार्गं निर्मातुं सफला जाता अस्ति।

वर्तमानकाले नारी परम्परा-आधुनिकतयोः मध्ये एकस्य 'सेतोः' इव स्थिता अस्ति। सा स्वमूलैः (परम्परया) अपि संलग्ना अस्ति, स्वपक्षैः (उड्डयनशक्त्या) च आकाशं मापयन्ती अस्ति। आधुनिकशिक्षया सा आत्मनिर्णयस्य शक्तिं प्राप्तवती, यया सा परिवार-समाज-राष्ट्राणां पुनरुत्थानं कुर्वती अस्ति। एषः 'सङ्गमः' नार्याः तं बहुआयामिनं पक्षं प्रदर्शयति यत्र सा एकतः मातृत्वस्य कोमलतां रक्षति, अन्यतः नेतृत्वस्य कठोरतां अपि धारयति। अद्यतनी नारी पुनः गार्गी-मैत्रेयीवत् दार्शनिकविमर्शे ज्ञानोत्पादिका सञ्जाता। अद्यतनी 'अन्नपूर्णा' न केवलं गृहं सञ्चालयति, अपितु स्टार्टअप-कॉर्पोरेट-क्षेत्रेषु वैश्विक-अर्थतन्त्रस्य आधारभूता अस्ति। नीतिनिर्माणस्य सामाजिकन्यायस्य च आन्दोलनेषु सा अग्रगण्या अस्ति, सामाजिककुरीतीनां विनाशं च करोति। सा 'सद्योवधू' रूपेण गृहस्थीं कुशलतया सञ्चालयति, परन्तु 'ब्रह्मवादिनी' रूपेण स्वकीयम् आत्मस्वरूपम् अपि अभिज्ञातवती। सा स्वयमेव स्वशक्तेः स्रोतः अस्ति। तस्याः अस्मिता कस्यचित् पुरुषस्य दयायां न, अपितु तस्याः चित्-शक्तौ आधारिता अस्ति।

**निष्कर्षः** अस्य विस्तृतविश्लेषणस्य निष्कर्षरूपेण वयं वक्तुं शक्नुमः यत् नारी न केवलं सामाजिका ईकाई, अपितु सृष्टेः शाश्वतं सत्यम् अस्ति। अस्याः यात्रायाः त्रयः मुख्याः स्तम्भाः सन्तिः। नरः नारी च न तु प्रतिद्वन्द्विनौ, अपितु एकस्याः एव सत्तायाः द्वौ अविभाज्यौ भागौ स्तः। यथा एकः पक्षी एकपक्षेण उड्डयितुं न शक्नोति, तथैव समाजस्य अभ्युत्थानं नरनार्योः संयोगमिलन असम्भवम्। शिव-शक्त्योः संयोगमेव पूर्णतायाः प्रतीकम्। माता बालकस्य प्रथमा शिक्षिका अस्ति। एकस्य संस्कारवतः समाजस्य निर्माणं शिक्षितनारीशक्तौ एव निर्भरं करोति। यदा एका नारी शिक्षिता भवति, तदा सा आगामिपीढ्यै नूतनां दिशं ददाति। नार्याः अस्मिता पुरुषस्य स्वीकृतौ न, अपितु तस्याः अन्तर्निहितायां 'आत्मशक्तौ' आधारिता अस्ति। सा स्वयमेव काली, सरस्वती, लक्ष्मी च अस्ति।

तस्यै केनापि 'शक्तिः' दातव्या नास्ति, अपितु सा केवलं स्वकीयं अनन्तसामर्थ्यं स्मरेत्। भारतीय-सनातन-परम्परायां नार्याः सम्मानः न तु 'उपकारः', अपितु प्रत्येकस्य समाजस्य 'अधिकारः' 'कर्तव्यं' च अस्ति। नारी सा आधारशिला अस्ति यस्याः अभावे न कश्चित् दर्शनः पूर्णः, न च काचित् संस्कृतिः जीविता भवितुं शक्नोति। सा स्वयमेव पूर्णता अस्ति, सृजनस्य उद्गमः अस्ति। नारीशक्तेः उत्थानमेव राष्ट्रस्य पुनर्जागरणस्य एकमात्रं द्वारमस्ति।

**सन्दर्भस्य-सूची-**

[1] सांख्यकारिका- 22

[2] शक्तिसंगम तन्त्र: (काली खण्ड:)- 1.55

[3] मुण्डमाला तन्त्र:- 2.7-8

[4] शिव पुराण:- वायवीय संहिता (उत्तर भाग)-5.29-30

[5] लिंग पुराण: (पूर्व भाग:)- 41.44-45

[6] प्रत्यभिज्ञाहृदयम्- 1-2

[7] मनुस्मृति:- 2-145

[8] महाभारत:-आदि पर्व:- 67.85-86

[9] मनुस्मृति:- 9.27

[10] मनुस्मृति:- 3.56

[11] बृहदारण्यक उपनिषद्- 3.6-8

[12] बृहदारण्यक उपनिषद्- 2.4.3

[13] वाल्मीकि रामायण:- 5.21.3

[14] महाभारत:, सभा पर्व:- 67.4

[15] महाभारत:, शान्ति पर्व:- 144.6

[16] वाल्मीकि रामायण:, अयोध्या काण्ड:-25.3

[17] वाल्मीकि रामायण:, उत्तरकाण्ड:- 91.25